# শ্রীগোবিন্দদামোদরস্তোত্র

{॥ শ্রীগোবিন্দদামোদরস্তোত্র ॥}

অগ্রে কুরূণামথ পাণ্ডবানাং দুঃশাসনেনাহৃতবস্ত্রকেশা ।

কৃষ্ণা তদাক্রোশদনন্যনাথা গোবিন্দ দামোদর মাধবেতি ॥ ১॥

শ্রীকৃষ্ণ বিষ্ণো মধুকৈটভারে ভক্তানুকম্পিন্ ভগবন্ মুরারে ।

ত্রায়স্ব মাং কেশব লোকনাথ গোবিন্দ দামোদর মাধবেতি ॥ ২॥

বিক্রেতুকামাখিলগোপকন্যা মুরারিপাদার্পিতচিত্তবৃত্তিঃ ।

দধ্যাদিকং মোহবশাদবোচদ্ গোবিন্দ দামোদর মাধবেতি ॥ ৩॥

উলূখলে সম্ভৃততণ্ডুলাংশ্চ সঙ্ঘট্টয়ন্ত্যো মুসলৈঃ প্রমুগ্ধাঃ ।

গায়ন্তি গোপ্যো জনিতানুরাগা গোবিন্দ দামোদর মাধবেতি ॥ ৪॥

কাচিৎকরাম্ভোজপুটে নিষণ্ণং ক্রীডাশুকং কিংশুকরক্ততুণ্ডম্ ।

অধ্যাপয়ামাস সরোরুহাক্ষী গোবিন্দ দামোদর মাধবেতি ॥ ৫॥

গৃহে গৃহে গোপবধূসমূহঃ প্রতিক্ষণং পিঞ্জরসারিকাণাম্ ।

স্খলদ্গিরং বাচয়িতুং প্রবৃত্তো গোবিন্দ দামোদর মাধবেতি ॥ ৬॥

পর্য্যঙ্কিকাভাজমলং কুমারং প্রস্বাপয়ন্ত্যোঽখিলগোপকন্যাঃ ।

জগুঃ প্রবন্ধং স্বরতালবন্ধং গোবিন্দ দামোদর মাধবেতি ॥ ৭॥

রামানুজং বীক্ষণকেলিলোলং গোপী গৃহীত্বা নবনীতগোলম্ ।

আবালকং বালকমাজুহাব গোবিন্দ দামোদর মাধবেতি ॥ ৮॥

বিচিত্রবর্ণাভরণাভিরামেঽভিধেহি বক্ত্রাম্বুজরাজহংসি ।

সদা মদীযে রসনেঽগ্ররঙ্গে গোবিন্দ দামোদর মাধবেতি ॥ ৯॥

অঙ্কাধিরূঢং শিশুগোপগূঢং স্তনং ধযন্তং কমলৈককান্তম্ ।

সম্বোধযামাস মুদা যশোদা গোবিন্দ দামোদর মাধবেতি ॥ ১০॥

ক্রীডন্তমন্তর্ব্রজমাত্মজং স্বং সমং বযস্যৈঃ পশুপালবালৈঃ ।

প্রেম্ণা যশোদা প্রজুহাব কৃষ্ণং গোবিন্দ দামোদর মাধবেতি ॥ ১১॥

যশোদযা গাঢমুলূখলেন গোকণ্ঠপাশেন নিবধ্যমানঃ ।

রুরোদ মন্দং নবনীতভোজী গোবিন্দ দামোদর মাধবেতি ॥ ১২॥

নিজাঙ্গনে কঙ্কণকেলিলোলং গোপী গৃহীত্বা নবনীতগোলম্ ।

আমর্দযৎপাণিতলেন নেত্রে গোবিন্দ দামোদর মাধবেতি ॥ ১৩॥

গৃহে গৃহে গোপবধূকদম্বাঃ সর্বে মিলিত্বা সমবাযযোগে ।

পুণ্যানি নামানি পঠন্তি নিত্যং গোবিন্দ দামোদর মাধবেতি ॥ ১৪॥

মন্দারমূলে বদনাভিরামং বিম্বাধরে পূরিতবেণুনাদম্ ।
গোগোপগোপীজনমধ্যসংস্থং গোবিন্দ দামোদর মাধবেতি ॥ ১৫॥

উত্থায় গোপ্যোঽপররাত্রভাগে স্মৃত্বা যশোদসুতবালকেলিম্ ।
গায়ন্তি প্রোচ্চৈর্দধি মন্থয়ন্ত্যো গোবিন্দ দামোদর মাধবেতি ॥ ১৬॥

জগ্ধোঽথ দত্তো নবনীতপিণ্ডো গৃহে যশোদা বিচিকিৎসয়ন্তী ।
উবাচ সত্যং বদ হে মুরারে গোবিন্দ দামোদর মাধবেতি ॥ ১৭॥

অভ্যর্চ্য গেহং যুবতিঃ প্রবৃদ্ধপ্রেমপ্রবাহা দধি নির্মমন্থ ।
গায়ন্তি গোপ্যোঽথ সখীসমেতা গোবিন্দ দামোদর মাধবেতি ॥ ১৮॥

ক্বচিত্ প্রভাতে দধিপূর্ণপাত্রে নিক্ষিপ্য মন্থং যুবতী মুকুন্দম্ ।
আলোক্য গানং বিবিধং করোতি গোবিন্দ দামোদর মাধবেতি ॥ ১৯॥

ক্রীডাপরং ভোজনমজ্জনার্থং হিতৈষিণী স্ত্রী তনুজং যশোদা ।
আজূহবত্ প্রেমপরিপ্লুতাক্ষী গোবিন্দ দামোদর মাধবেতি ॥ ২০॥

সুখং শয়ানং নিলয়ে চ বিষ্ণুং দেবর্ষিমুখ্যা মুনয়ঃ প্রপন্নাঃ ।
তেনাচ্যুতে তন্ময়তাং ব্রজন্তি গোবিন্দ দামোদর মাধবেতি ॥ ২১॥

বিহায় নিদ্রামরুণোদয়ে চ বিধায় কৃত্যানি চ বিপ্রমুখ্যাঃ ।

বেদাবসানে প্রপঠন্তি নিত্যং গোবিন্দ দামোদর মাধবেতি ॥ ২২॥

বৃন্দাবনে গোপগণাশ্চ গোপ্যো বিলোক্য গোবিন্দবিয়োগখিন্নম্ ।

রাধাং জগুঃ সাশ্রুবিলোচনাভ্যাং গোবিন্দ দামোদর মাধবেতি ॥ ২৩॥

প্রভাতসঞ্চারগতা নু গাবস্তদ্রক্ষণার্থং তনয়ং যশোদা ।

প্রাবোধযত্ পাণিতলেন মন্দং গোবিন্দ দামোদর মাধবেতি ॥ ২৪॥

প্রবালশোভা ইব দীর্ঘকেশা বাতাম্বুপর্ণাশনপূতদেহাঃ ।

মূলে তরূণাং মুনয়ঃ পঠন্তি গোবিন্দ দামোদর মাধবেতি ॥ ২৫॥

এবং ব্রুবাণা বিরহাতুরা ভৃশং ব্রজস্ত্রিয়ঃ কৃষ্ণবিষক্তমানসাঃ ।

বিসৃজ্য লজ্জাং রুরুদুঃ স্ম সুস্বরং গোবিন্দ দামোদর মাধবেতি ॥ ২৬॥

গোপী কদাচিন্মণিপিঞ্জরস্থং শুকং বচো বাচযিতুং প্রবৃত্তা ।

আনন্দকন্দ ব্রজচন্দ্র কৃষ্ণ গোবিন্দ দামোদর মাধবেতি ॥ ২৭॥

গোবৎসবালৈঃ শিশুকাকপক্ষং বধ্নন্তমম্ভোজদলাযতাক্ষম্ ।

উবাচ মাতা চিবুকং গৃহীত্বা গোবিন্দ দামোদর মাধবেতি ॥ ২৮॥

প্রভাতকালে বরবল্লবৌঘা গোরক্ষণার্থং ধৃতবেত্রদণ্ডাঃ ।

আকারযামাসুরনন্তমাদ্যং গোবিন্দ দামোদর মাধবেতি ॥ ২৯॥

জলাশয়ে কালিয়মর্দনায় যদা কদম্বাদপতন্মুরারিঃ ।

গোপাঙ্গনাশ্চুক্রুশুরেত্য গোপা গোবিন্দ দামোদর মাধবেতি ॥ ৩০॥

অক্রূরমাসাদ্য যদা মুকুন্দশ্চাপোৎসবার্থং মথুরাং প্রবিষ্টঃ ।

তদা স পৌরৈর্জয়তীত্যভাষি গোবিন্দ দামোদর মাধবেতি ॥ ৩১ ॥

কংসস্য দূতেন্ যদৈব নীতৌ বৃন্দাবনান্তাদ্ বসুদেবসূনূ ।

রুরোদ গোপী ভবনস্য মধ্যে গোবিন্দ দামোদর মাধবেতি ॥ ৩২ ॥

সরোবরে কালিয়নাগবদ্ধং শিশুং যশোদাতনয়ং নিশম্য ।

চক্রুর্লুঠন্ত্যঃ পথি গোপবালা গোবিন্দ দামোদর মাধবেতি ॥ ৩৩॥

অক্রূরযানে যদুবংশনাথং সঙ্গচ্ছমানং মথুরাং নিরীক্ষ্য ।

ঊচুর্বিয়োগত্ কিলগোপবালা গোবিন্দ দামোদর মাধবেতি ॥ ৩৪ ॥

চক্রন্দ গোপী নলিনীবনান্তে কৃষ্ণেন হীনা কুসুমে শয়ানা ।

প্রফুল্লনীলোৎপললোচনাভ্যাং গোবিন্দ দামোদর মাধবেতি ॥ ৩৫॥

মাতাপিতৃভ্যাং পরিবার্যমাণা গেহং প্রবিষ্টা বিললাপ গোপী ।

আগত্য মাং পালয় বিশ্বনাথ গোবিন্দ দামোদর মাধবেতি ॥ ৩৬॥

বৃন্দাবনস্থং হরিমাশু বুদ্ধ্বা গোপী গতা কাপি বনং নিশায়াম্ ।

তত্রাপ্যদৃষ্ট্বাতিভযাদবোচদ্ গোবিন্দ দামোদর মাধবেতি ॥ ৩৭॥

সুখং শযানা নিলযে নিজেঽপি নামানি বিষ্ণো প্রবদন্তি মর্ত্যাঃ ।
তে নিশ্চিতং তন্মযতাং ব্রজন্তি গোবিন্দ দামোদর মাধবেতি ॥ ৩৮॥

সা নীরজাক্ষীমবলোক্য রাধাং রুরোদ গোবিন্দবিযোগখিন্নাম্ ।
সখী প্রফুল্লোৎপললোচনাভ্যাং গোবিন্দ দামোদর মাধবেতি ॥ ৩৯॥

জিহ্বে রসজ্ঞে মধুরপ্রিযা ত্বং সত্যং হিতং ত্বং পরমং বদামি ।
আবর্ণযেথা মধুরাক্ষরাণি গোবিন্দ দামোদর মাধবেতি ॥ ৪০॥

আত্যন্তিকব্যাধিহরং জনানাং চিকিৎসকং বেদবিদো বদন্তি ।
সংসারতাপত্রযনাশবীজং গোবিন্দ দামোদর মাধবেতি ॥ ৪১॥

তাতাজ্ঞযা গচ্ছতি রামচন্দ্রে সলক্ষ্মণেঽরণ্যচযে সসীতে ।
চক্রন্দ রামস্য নিজা জনিত্রী গোবিন্দ দামোদর মাধবেতি ॥ ৪২॥

একাকিনী দণ্ডককাননান্তাত্ সা নীযমানা দশকন্ধরেণ ।
সীতা তদাক্রন্দদনন্যনাথা গোবিন্দ দামোদর মাধবেতি ॥ ৪৩॥

রামাদ্বিযুক্তা জনকাত্মজা সা বিচিন্তযন্তী হৃদি রামরূপম্ ।
রুরোদ সীতা রঘুনাথ পাহি গোবিন্দ দামোদর মাধবেতি ॥ ৪৪॥

প্রসীদ বিষ্ণো রঘুবংশনাথ সুরাসুরাণাং সুখদুঃখঃহেতো ।

রুরোদ সীতা তু সমুদ্রমধ্যে গোবিন্দ দামোদর মাধবেতি ॥ ৪৫॥

অতর্জলে গ্রাহগৃহীতপাদো বিসৃষ্টবিক্লিষ্টসমস্তবন্ধুঃ ।

তদা গজেন্দ্রো নিতরাং জগাদ গোবিন্দ দামোদর মাধবেতি ॥ ৪৬॥

হংসধ্বজঃ শঙ্খযুতো দদর্শ পুত্রং কটাহে প্রপতন্তমেনম্ ।

পুণ্যানি নামানি হরের্জপন্তং গোবিন্দ দামোদর মাধবেতি ॥ ৪৭॥

দুর্বাসসো বাক্যমুপেত্য কৃষ্ণা সা চাব্রবীত্ কাননবাসিনীশম্ ।

অন্তঃপ্রবিষ্টং মনসাজুহাব গোবিন্দ দামোদর মাধবেতি ॥ ৪৮॥

ধ্যেয়ঃ সদা যোগিভিরপ্রমেয়ঃ চিন্তাহরশ্চিন্তিতপারিজতঃ ।

কস্তূরিকাকল্পিতনীলবর্ণো গোবিন্দ দামোদর মাধবেতি ॥ ৪৯॥

সংসারকূপে পতিতোঽত্যগাধে মোহান্ধপূর্ণে বিষযাভিতপ্তে ।

করাবলম্বং মম দেহি বিষ্ণো গোবিন্দ দামোদর মাধবেতি ॥ ৫০॥

ত্বামেব যাচে মম দেহি জিহ্বে সমাগতে দণ্ডধরে কৃতান্তে ।

বক্তব্যমেবং মধুরং সুভক্ত্যা গোবিন্দ দামোদর মাধবেতি ॥ ৫১॥

ভজস্ব মন্ত্রং ভববন্ধমুক্ত্যৈ জিহ্বে রসজ্ঞে সুলভং মনোজ্ঞম্ ।

দ্বৈপায়নাদ্যৈর্মুনিভিঃ প্রজপ্তং গোবিন্দ দামোদর মাধবেতি ॥ ৫২॥

গোপাল বংশীধর রূপসিন্ধো লোকেশ নারায়ণ দীনবন্ধো ।
উচ্চস্বরৈস্ত্বং বদ সর্বদৈব গোবিন্দ দামোদর মাধবেতি ॥ ৫৩॥

জিহ্বে সদৈবং ভজ সুন্দরাণি নামানি কৃষ্ণস্য মনোহরাণি ।
সমস্তভক্তার্তিবিনাশনানি গোবিন্দ দামোদর মাধবেতি ॥ ৫৪॥

গোবিন্দ গোবিন্দ হরে মুরারে গোবিন্দ গোবিন্দ মুকুন্দ কৃষ্ণ ।
গোবিন্দ গোবিন্দ রথাঙ্গপাণে গোবিন্দ দামোদর মাধবেতি ॥ ৫৫॥

সুখাবসানে ত্বিদমেব সারং দুঃখাবসানে ত্বিদমেব গেযম্ ।
দেহবসানে ত্বিদমেব জাপ্যং গোবিন্দ দামোদর মাধবেতি ॥ ৫৬॥

দুর্বারবাক্যং পরিগৃহ্য কৃষ্ণা মৃগীব ভীতা তু কথং কথঞ্চিত্ ।
সভাং প্রবিষ্টা মনসাজুহাব গোবিন্দ দামোদর মাধবেতি ॥ ৫৭॥

শ্রীকৃষ্ণ রাধাবর গোকুলেশ গোপাল গোবর্ধন নাথ বিষ্ণো ।
জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৫৮॥

শ্রীনাথ বিশ্বেশ্বর বিশ্বমূর্তে শ্রীদেবকীনন্দন দৈত্যশত্রো ।
জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৫৯॥

গোপীপতে কংসরিপো মুকুন্দ লক্ষ্মীপতে কেশব বাসুদেব ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬০॥

গোপীজনাহ্লাদকর ব্রজেশ গোচারণারণ্যকৃতপ্রবেশ ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬১॥

প্রাণেশ বিশ্বম্ভর কৈটভারে বৈকুণ্ঠ নারাযণ চক্রপাণে ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬২॥

হরে মুরারে মধুসূদনাদ্য শ্রীরাম সীতাবর রাবণারে ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬৩॥

শ্রীযাদবেন্দ্রাদ্রিধরাম্বুজাক্ষ গোগোপগোপীসুখদানদক্ষ ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬৪॥

ধরাভরোত্তারণগোপবেষ বিহারলীলাকৃতবন্ধুশেষ ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬৫॥

বকীবকাঘাসুরধেনুকারে কেশীতৃণাবর্তবিঘাতদক্ষ ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬৬॥

শ্রীজানকীজীবন রামচন্দ্র নিশাচরারে ভরতাগ্রজেশ ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬৭॥

নারাযণানন্ত হরে নৃসিংহ প্রহ্লাদবাধাহর হে কৃপালো ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬৮॥

লীলামনুষ্যাকৃতিরামরূপ প্রতাপদাসীকৃতসর্বভূপ ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৬৯॥

শ্রীকৃষ্ণ গোবিন্দ হরে মুরারে হে নাথ নারাযণ বাসুদেব ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৭০॥

বক্তুং সমর্থোঽপি ন বক্তি কশ্চিদহূ জনানাং ব্যসনাভিমুখ্যম্ ।

জিহ্বে পিবস্বামৃতমেতদেব গোবিন্দ দামোদর মাধবেতি ॥ ৭১॥

ইতি শ্রী বিল্বমঙ্গলাচার্য বিরচিতং শ্রীগোবিন্দদামোদর স্তোত্রং সম্পূর্ণম্

শ্লোক ৪২-৪৫ পাঠান্তর

গোবিন্দ দামোদর মাধবেতি

স্থানমে

হে রাম রঘুনন্দন রাঘবেতি

Encoded by Damodar Godse dgodse at aracnet.net

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Govinda Damodara Stotram Lyrics in Bengali PDF
% File name : govind.itx
% Location : doc_vishhnu
% Author : bilvamangalAchArya
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Damodar Godse - dgodse at aracnet.net
% Proofread by : Damodar Godse - dgodse at aracnet.net
% Translated by : without permission. A defamation campaign may follow against the violator.
% Latest update : August 28, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website